हिमसंस्कृतवार्ता

दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

**पञ्चाङ्गम्**

अद्य कालयुक्तः वि.सं. २०८२,
कलियुगाब्धः ५१२६ वसन्त-ऋतुः
सूर्यः उत्तरायणः वैशाखकृष्णनवमी
वैशाख ९ प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-173 | 1 | अप्रैल 22, 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 नवदेहल्यां सप्तदशे लोकसेवा-दिवसावसरे लोक-सेवकान् सम्बोधितवान् प्रधानमन्त्री नरेन्द्रमोदी

3 हिमाचलप्रदेशविद्युत्मण्डले टीमेट- लाइनमेन- इत्येतयोः २००० पदानां नियुक्तिः, विद्युत् हानिः निवारयितुं दृढ़प्रावधानाः

4 सर्वोच्चन्यायालयेन पश्चिमबङ्गप्रदेशे राष्ट्रपतिशासनस्य अर्धसैनिकबलानाम् नियुक्त्यर्थं च याचिकायां किमपि आदेशं पारयितुं अस्वीकृतम्

## झारखण्डस्य बोकारो जनपदे सुरक्षाबलैः साकं सञ्जाते संघर्षे अष्टनक्सलवादिनो मारिताः



हिमसंस्कृतवार्ताः - झारखण्डे बोकारो जनपदस्य लुगु-पहाड़ीति पर्वत-क्षेत्रे नक्सलवादीनाम्, आरक्षिबालानाम् अर्धसैनिकबालानां च संयुक्तदलस्य मध्ये सञ्जाते संघर्षे अष्टनक्सलवादिनः पञ्चतां प्रापिताः सन्ति। झारखण्डस्य डी.जी.पी आरक्षि-महानिदेशकेन अनुराग-गुप्त-वर्येणोक्तं यत् अस्माकं सुरक्षा-बलेन एते माओवादिनो मारिताः। श्रीगुप्तवर्यः प्रत्यपादयत् यत् प्रायः होराद्वयं यावत् प्रचलितम् इदम् अभियानम् झारखंड-जगुआर इत्यनेन बलेन, आरक्षि-बलेन, सी.आर.पी.एफ. बलेन च सम्भूय सम्पूरितम्।

## संयुक्तराज्य अमेरिकायाम् भारतीय-प्रवासि-समुदायं सम्बोधितवती वित्तमन्त्री निर्मला सीतारमणः

### वित्तमन्त्री एतद् रेखांकितम् अकरोत् यत् भारतम् 'सनराइज सेक्टर्स' इति क्षेत्रं प्राथम्येन पश्यति

हिमसंस्कृतवार्ताः - वित्तमन्त्री निर्मला सीतारमण अवदत् यत् सर्वकारस्य 'विकसित भारतमिति अभियानस्य दृष्टिः सप्तचत्वारिंशदुत्तर-द्वि-सहस्र-तम-वर्षं यावत् महिलानां, निर्धनानां, युवजनानां, कृषकाणां च प्रभावित-क्षेत्रेषु परिष्कारं विलोकयति। संयुक्तराज्य अमेरिकायाम् भारतीय प्रवासि-समुदायं सम्बोधयन्ती, वित्तमन्त्री एतद् रेखांकितम् अकरोत् यत् भारतम् 'सनराइज सेक्टर्स' इति क्षेत्रं प्राथम्येन पश्यति। अथ च एतद्धि डिजिटल पब्लिक इंफ्रास्ट्रक्चर इति क्षेत्रे मुख्यत्वेन समुदितम् अस्ति, यच्च नवाचारं विकासं च समेधयति। श्रीमती सीतारमण प्रोदितवती यत् भारतम् प्रधानमन्त्रिणो नरेन्द्रमोदिनो दूरदर्शितायुते नेतृत्वे स्थिर-प्रशासन-द्वारा प्रदत्त-स्थिरतायाः कारणेन जवीयस्या गत्या समेधमाना अर्थव्यवस्था सञ्जाता अस्ति। ध्येयमस्ति यत् श्रीमती सीतारमणवर्या संयुक्तराज्यअमेरिकायाः पञ्च-दिवसीय-यात्रायां वर्तते।

# अमेरिकीय उपराष्ट्रपतिः जेडी-वेंसः चतुर्दिवसीय यात्रायां भारतं सम्प्राप्तः

## प्रधानमन्त्रिणा मोदिना साकमपि मेलनं जातम्





हिमसंस्कृतवार्ताः - अमेरिकीयः उपराष्ट्रपतिः जे. डी. वेंसः गतदिवसे नवदेहलीं प्राप्तः। चतुर्दिवसीय-भारत-यात्रायाम् आगतस्य अमेरिकीय-उपराष्ट्रपतेः जे. डी. वेंस इत्यस्य स्वागतसत्कारं सूचना-प्रसारण-मन्त्री अश्विनी वैष्णवः कृतवान्। अवधेयमस्ति यद् उपराष्ट्रपतेः वेंसस्य एषा प्रथमा भारत-यात्रा वर्तते। देहलीम् आगत्य अमेरिकायाः उपराष्ट्रपतिः जेडी वेंसः, तत्रत्या द्वितीया महिला च उषा वेंसः सपरिवारं अक्षरधाम मन्दिरं गत्वा अक्षर-पुरुषोत्तम-भगवतः पुण्यदर्शनं कृतवन्तः। अथ च सांयकाले असौ प्रधानमन्त्रिणा नरेन्द्रमोदिना साकं सम्भाषणम् कृतवान्। अमेरिकीय-उपराष्ट्रपतेः जे डी वेंसस्य भारत-यात्रा देश-द्वयस्य द्वै-पाक्षिक-सम्बन्धानां प्रगतेः समीक्षायाः, किञ्च अस्मिन् वर्षे फरवरीमासस्य त्रयोदश्यां प्रधानमन्त्रिणः नरेन्द्र-मोदिनः अमेरिका-यात्रायाः अवसरे प्रख्यापितस्य भारत-अमेरिका-संयुक्त-वक्तव्यस्य परिणामानां कार्यान्वयनस्य च कृते अवसरं प्रदास्यति। उभावपि पक्षौ परस्परं हितानां क्षेत्रीय-विकासेषु वैश्विक विकासेषु च विचार-विनिमयमपि अकुरुताम्। प्रधानमन्त्री मोदी, अमेरिकीय उपराष्ट्रपतिः वैन्स् च ऊर्जा, रक्षा, रणनीतिक प्रौद्योगिक्याः च सहकार्यं वर्धयितुं सततं प्रयत्नानाम् चर्चां कृतवन्तौ। भारत-अमेरिका-द्विपक्षीयव्यापारसन्धेः प्रगतेः स्वागतम् अपि प्रधानमन्त्री मोदी, वैन्स् च कृतवन्तौ। ततः पूर्वं जेडी वैन्सः प्रधानमन्त्रिणः निवासस्थानं प्राप्य तस्य साक्षात्कारं कृतवान्। अस्मिन् काले वैन्सस्य परिवारः तस्य समीपे आसीत्। जेडीवेंसः सपरिवारम् अक्षरधाममन्दिरे एकहोरां यावत् दर्शनं कृतवान्। तस्येयं यात्रा सांस्कृतिकार्थिकदृष्ट्या महत्वपूर्णास्ति

**सुभाषितम्**

**अमृतं चैव मृत्युश्च,**
**द्वयं देहप्रतिष्ठितम्।**
**मोहादापद्यते मृत्युः,**
**सत्येनापद्यतेऽमृतम्।।**

भावार्थः- अमरता और मृत्यु दोनों ही हमारे शरीर मे साथ में निवास करते हैं, बस मोह के कारण मृत्यु आती है और सत्य के कारण अमरत्व की प्राप्ति होती है।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

# पोप फ्रांसिसः सुदीर्घरोगानन्तरं निधनम् उपगतः प्रधानमन्त्रिणा मोदिना प्रकटिताः शोकसंवेदनाः

हिमसंस्कृतवार्ताः - पोप फ्रांसिस इत्यस्य अष्टाशीति-वर्ष-वयोमिते आयौ सुदीर्घ-रोगस्य कारणेन निधनं जातम्। असौ विभिन्नरोगैः पीडितः आसीत्, अथ च साम्प्रतिकेषु सप्ताहेषु तस्य स्थितिः अतोऽपि गम्भीरा जाता आसीत्। पोप फ्रांसिसः निर्धनानां कृते सहयोगाचरण-परस्य कैथोलिक चर्च-गृहस्य नूतानाकार-प्रवर्तकत्वेन अभिज्ञायते। पोप-फ्रांसिसः त्रयोदशोत्तर-द्वि-सहस्र-तम-वर्षात् पूर्व लैटिन अमेरिकीय-पोप-पदत्वेन प्रचितः आसीत्। असौ चर्चस्य इतिहासे सर्वाधिक-वृद्ध-पोपेषु एकतमः मन्यते। तस्य निधनं वेटिकन नगरस्य कासा-सांटा-मार्टा-स्थिते तदीये एव निवासे जातम्। असौ सुदीर्घ-समयात् रुग्णः चलति स्म। अथ च असौ एकमास-पर्यन्तम् उपचारानन्तरं मार्च-चतुर्विंश्यां निजे निवासे प्रत्यावर्तितः आसीत्।



प्रधानमन्त्रिणा मोदिना प्रकटिताः शोकसंवेदनाः।

अत्रावसरे प्रधानमन्त्री नरेन्द्रमोदी पोप फ्रांसिसस्य निधने गहनं दुःखं प्रकटितवान्। सममेव वैश्विक-कैथोलिक-समुदायं प्रति संवेदनाश्चापि व्यक्तीकृताः सन्ति। सामाजिक संजालीये-सन्देशे श्रीमोदी उदैरयत् यत्, पोप फ्रांसिसः सर्वदा करुणा-विनम्रता-आध्यात्मिक साहसादिनां प्रतीकत्वेन स्मरिष्यते। श्रीमोदिना पोपेन साकं विहितानि नैजानि उपवेशनानि अपि स्मृतानि, प्रोक्तं च यत् पोपस्य समावेशितापूर्ण सर्वांगीण विकासं प्रति प्रतिबद्धतया असौ प्रेरितः अस्ति। अत्रावसरे जर्मनदेशस्य चांसलर इति राष्ट्राध्यक्षेण ओलाफ स्कोल्ज इत्यमुना, ब्रिटिश प्रधानमन्त्रिणा कीर स्टारमर-वर्येण, इटली देशस्य प्रधानमन्त्रिणा मेलोनी वर्यया, फ्रांस-राष्ट्रपतिना इमैनुअल मैक्रों इत्यमुना चापि गम्भीरः शोकः प्रकटितः अस्ति।

# नवदेहल्यां सप्तदशे लोकसेवा-दिवसावसरे लोक-सेवकान्

## सम्बोधितवान् प्रधानमन्त्री नरेन्द्रमोदी

### उक्तवान् च यत् भारतं शासने, पारदर्शितायां नवाचारेषु च नवीनं मानदण्डं स्थापयति




हिमसंस्कृतवार्ताः - प्रधानमन्त्री श्रीनरेन्द्रमोदी उक्तवान् यत् भारतं शासन-पारदर्शिता-नवाचारादि-क्षेत्रेषु नूतनं मानकं स्थापयति। अमुना प्रोक्तं यद् देशे विगते दशके क्रान्ति-कराणि परिवर्तनानि जातानि सन्ति। अथ च सम्प्रति एतद् परिवर्तनं केवलं विकासे एव केन्द्रितं नास्ति, प्रत्युत एतेषु क्षेत्रेषु नूतनं मानकमपि स्थापयति। श्रीमोदी नवदेहल्यां सप्तदशे लोकसेवा-दिवसावसरे लोक-सेवकान् सम्बोधयन् एतट्टिप्पणीं कृतवान्। प्रधानमन्त्रिणा देशस्य युवकानां, कृषकाणां महिलानां च अभिलाषाणां पूरणार्थम् असाधारण-गतेः आवश्यकतां रेखांकयता प्रोदितम् यत् तेषां स्वप्नाः अभूतपूर्व शिखरं स्पृशन्ति । एतदतिरिक्तम् आकांक्षि-जनपद-कार्यक्रमाणां विषये सम्भाषमाणः, प्रधानमन्त्री प्रोक्तवान् यत् अस्य उपक्रमस्य माध्यमेन देशस्य विभिन्न-भागेषु स्वास्थ्य-सामाजिक-विकासानाम्, आधारिक-संरचनानां च प्रमुख-संकेतकेषु अभूतपूर्व-परिवर्तनानि दरीदृश्यन्ते। अनेन भणितं यत् शासनस्य गुणवत्ता अनेन निर्धार्यते यत् शासनस्य लाभयोजनाः लोकं यावत् कियत्या तीव्र-गत्या प्राप्नुवन्ति। तासां योजनानां धरातलीय-स्तरे कियान् वास्तविकः प्रभावः जायते। अनेन अस्मिन् विषयेऽपि प्रकाशः क्षिप्तः यत् प्रौद्योगिक्याः अस्मिन् युगे शासनस्य अभिप्रायः व्यवस्थानां प्रबन्धनमेव नास्ति, प्रत्युत संभावनानां वर्धनम् अस्ति। निजे भाषणे श्रीमोदी यस्या गत्या परिवर्तमाने अस्मिन् समये वैश्विक-समाह्वानानाम् उपरि निशित-दृष्टि-निक्षेपस्य आवश्यकतायामपि विशेषं बलं प्रदत्तवान्। असौ उक्तवान् यत् खाद्य-जल-ऊर्जा-सुरक्षादि-विषयाः साम्प्रतमपि बृहत् समाह्वानत्वेन स्थिताः सन्ति, तदपि सविशेषं दक्षिणविश्वे एतत् समाह्वानम् अधिकं वर्तते। एतस्मिन् अवसरे श्रीमोदी जनपदानां समग्रविकासस्य, आकांक्षि-उपखण्ड-कार्यक्रमाणां, नवाचाराणां च श्रेणीसु लोक-प्रशासने उत्कृष्टतायै लोक-सेवकेभ्यः प्रधानमन्त्री पुरस्कारान् प्रदत्तवान्। अमुना कार्यक्रमस्य अवसरे ई-बुक इति पुस्तकद्वयम् अपि प्रख्यापितम्।

### प्रधानमन्त्री श्रीनरेन्द्रमोदी सऊदी अरबदेशस्य द्वि-दिवसीय यात्रायाम् अद्य जेद्दाहनगरं संप्राप्स्यति



हिमसंस्कृतवार्ताः - प्रधानमन्त्री श्रीनरेन्द्रमोदी सऊदी अरबदेशस्य द्वि-दिवसीय यात्रायाम् अद्य जेद्दाहनगरं संप्राप्स्यति, एषा यात्रा चतुर्दशकेषु भारतीयनेतृणां सऊदी अरबस्य वाणिज्यिक केन्द्रस्य प्रथमा यात्रा अस्ति। प्रधानमन्त्री स्वीय-यात्रावधौ एकस्मिन् समवाये कार्यरतैः भारतीय-कार्मिकैः सह संवादं विधास्यति। एषा उच्चस्तरीया यात्रा भारत-सऊदी अरब देशयोः सम्बन्धानां साधारणस्थितितः आर्थिक-रक्षा-सांस्कृतिक-आयामेषु विस्तृत रणनीतिक-सहभागित्वं यावत् उल्लेखनीयं परिवर्तनं प्रकाशयति। प्रधानमन्त्रिणः एषा महत्त्वपूर्णा यात्रा अस्ति, यस्य उद्देश्यः द्वयोः देशयोः सामरिक सहभागितायाः संवर्धनं वर्तते।

## भारतस्य ऋतु-विज्ञान-विभागेन आगामिषु पञ्चदिवसेषु मध्य-भारते उष्ण-वायु-तरङ्गस्य स्थितेः पूर्वानुमानं कृत्वा सङ्केतना प्रसारिता

हिमसंस्कृतवार्ताः - भारतस्य ऋतु-विज्ञान-विभागेन आगामिषु पञ्चदिवसेषु मध्य-भारते उष्ण-वायु-तरङ्गस्य स्थितेः पूर्वानुमानं कृतम्। विभागस्यानुसारं पूर्वराजस्थान-मध्यप्रदेश-विदर्भ-छत्तीसगढ़ेषु अस्य मासस्य पञ्चविंशतिः दिनाङ्कपर्यन्तं उष्ण-वायु-तरङ्गस्य स्थितिः भवितुं शक्नोति। आगामिषु त्रि-दिवसेषु मध्यभारते गुजराते च अधिकतमं तापमानं द्वि-डिग्री-सेल्सियस-पर्यन्तं, आगामिषु चतुर्दिवसेषु पूर्वभारते षट् डिग्री सेल्सियस-पर्यन्तं च सम्वर्धिष्यते इति अपेक्ष्यते। इदानीं पूर्वोत्तरभारते अस्य मासस्य षड्विंशतिः दिनाङ्कपर्यन्तं प्रचण्डवृष्टिः भविष्यति ।

# हिमाचले क्रियान्वितः भवेत् अधिनियमः, राहुलगांधी मुख्यमंत्रिणे पत्रं लिखितवान्



हिमसंस्कृतवार्ताः- नवदेहली। काङ्ग्रेसनेता राहुलगान्धी इदानीं सामाजिकभेदभावस्य उन्मूलनार्थं दलनेतृत्वेन हिमाचल-तेलङ्गाना-सर्वकारेभ्यः पत्रं लिखित्वा जातिभेदस्य समाप्तिम् विना प्रगतिः सम्भवः नास्ति, अतः वेमुला-अधिनियमः कार्यान्वितः इति आग्रहं कृतवान्। सः अवदत् यत् समाजस्य सर्वेषां वर्गानां कृते अवसराः स्युः, कस्यचित् विरुद्धं भेदभावः न भवेत्, अतः हिमाचल- तेलङ्गाना- सर्वकारेण स्वराज्येषु भेदभावस्य उन्मूलनार्थं वेमुला-अधिनियमस्य कार्यान्वयनं करणीयम् इति। राहुलगान्धी इत्यनेन पूर्वं कर्णाटकसर्वकाराय एतादृशं पत्रं लिखितम् आसीत्। सः अवदत् यत्, "यावत् प्रत्येकं छात्रं भेदभावं विना सम्मानं, सुरक्षां, समानं अवसरं च न प्राप्नोति तावत् अस्माकं शिक्षाव्यवस्था सर्वेषां प्रति न्यायपूर्णा न भवितुम् अर्हति। कर्नाटकस्य मुख्यमन्त्री सिद्धारमैया इत्यस्मै पत्रं लिखित्वा हिमाचलप्रदेशस्य मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः इत्यस्मै तेलङ्गाना मुख्यमन्त्री रेवन्तरेड्डी इत्यस्मै च पत्रं लिखित्वा 'रोहितवेमुला अधिनियमस्य' कार्यान्वयनार्थं आग्रहं कृतवान्। लोकसभायां विपक्षनेता उक्तवान् यत् काङ्ग्रेसपक्षः प्रत्येकस्य बालकस्य शिक्षायाः समानप्रवेशं प्रदातुं जातिभेदं च निवारयितुं पूर्णतया प्रतिबद्धः अस्ति।

# बाबासाहेबस्य डॉ भीमराव-अम्बेडकरस्य काङ्ग्रेसेन राजनैतिकोपेक्षा कृता- अनुरागठाकुरः




हिमसंस्कृतवार्ताः - शिमला।पूर्वकेन्द्रीयमन्त्री, हमीरपुरलोकसभाक्षेत्रस्य सांसदः च अनुरागठाकुरः आरोपितवान् यत् काङ्ग्रेसपक्षेण बाबासाहेबभीमराव अम्बेडकरः राजनैतिकक्षेत्रे पृष्ठे कृतः। असौ भारतीय-जनता-पार्टी द्वारा आयोजितस्य डॉ. भीमराव अम्बेडकर-सम्मानाभियानस्य अन्तर्गतं बिहारस्य भोजपुरे तथा बंगालस्य कोलकातायां जनसभाः सम्बोधयन् आसीत्। अनुरागः अवदत् यत् अम्बेडकरः भारतमातुः सत्यपुत्रः आसीत्। सः दुष्प्रथानां समाप्तियुक्तस्य सामञ्जस्यपूर्णस्य समाजस्य स्थापनायाः विषये बलं दत्तवान्। बाबा साहेबः वंचितानाम्, उत्पीडितानां, शोषितानां, निर्धनानाम्, आदिवासीनां, महिलानां च जीवने परिवर्तनं आनेतुं प्रयतन्ते स्म। प्रधानमन्त्री मोदी बाबासाहेबस्य स्वप्नानां भारतस्य निर्माणाय प्रयतते। काङ्ग्रेसः बाबासाहेबस्य अपमानार्थं कार्यं कुर्वन् अस्ति। बाबा साहेबस्य बङ्गालात् संविधानसभां गन्तुं निवारयितुं काङ्ग्रेसेन रणनीतिः स्वीकृत्य तस्य निर्वाचनक्षेत्रं पाकिस्तानाय दत्तम्। अनुरागः अवदत् यत् काङ्ग्रेसस्य कारणेन लोकसभानिर्वाचनद्वये अम्बेडकरस्य पराजयस्य सम्मुखीकरणं कर्तव्यम् अभवत्। उभयनिर्वाचनेषु जवाहरलालनेहरू अम्बेडकरविरुद्धं प्रचारं कृतवान्। १९५२ तमे वर्षे बम्बई उत्तरकेंद्रमध्ये प्रतिद्वन्द्वं कृत्वा काङ्ग्रेसपक्षः नारायणकजरोलकरं पराजयितुं तस्य प्रत्याशिरूपेण स्थापयति स्म। अम्बेडकरः १५,००० मतैः पराजितः अभवत्। अम्बेडकरः परिणामेषु प्रश्नं कृतवान्। १९५४ तमे वर्षे बाबासाहेबः महाराष्ट्रस्य भण्डारातः द्वितीयनिर्वाचनं कृतवान्। अनुरागः अवदत् यत् अस्मिन् समये सः काङ्ग्रेस-प्रत्याशिना सह प्रायः ८५०० मतैः पराजितः अभवत्। १९५१ तमे वर्षे नेहरूमन्त्रिमण्डलात् त्यागपत्रं दत्त्वा बाबासाहेबः अवदत् यत् नेहरू आर्थिकनीतिभ्यः, मन्त्रिमण्डलसंस्थाभ्यः च दूरं स्थापयितुं प्रयतते इति। काङ्ग्रेसेन बाबासाहेबस्य महापरिनिर्वाणानन्तरं दिल्लीनगरे दाहसंस्कारः न अनुमन्यते, तस्य मर्त्यशरीरं मुम्बईनगरं नेतुम् राज्यविमानं न प्रदत्तम्, तस्य दिल्लीनिवासस्थानं स्मारकरूपेण घोषयितुम् अपि अस्वीकृतम्। २०१८ तमे वर्षे मोदीसर्वकारेण श्रद्धांजलिस्थलरूपेण राष्ट्राय समर्पितम्। सः अवदत् यत् अम्बेडकरस्य धरोहरस्य संरक्षणस्य कार्यं भारतीयजनतापक्षेण कृतम् अस्ति। १९८९ तमे वर्षे यदा सर्वकारस्य निर्माणं जातं, तदा पूर्वप्रधानमन्त्री अटलबिहारी वाजपेयी, लालकृष्ण आडवाणी च संसदस्य केन्द्रीयभवने बाबासाहेबस्य चित्रं समावेशयितुं उपक्रमं कृतवन्तौ। बाबा साहेबस्य जन्मस्थाने महू इत्यत्र राष्ट्रियस्मारकं निर्मितम्। अम्बेडकरस्य जन्मभूमिः, शिक्षास्थानं, दीक्षास्थानं, तस्य सम्बद्धानि सर्वाणि स्थानानि च पञ्च तीर्थरूपेण विकसितानि सन्ति।


# हिमाचलप्रदेशविद्युत्मण्डले टीमेट- लाइनमेन- इत्येतयोः २००० पदानां नियुक्तिः, विद्युत् हानिः निवारयितुं दृढ़प्रावधानाः



हिमसंस्कृतवार्ताः- मुख्यमन्त्रिणा साकं संगोष्ठ्यां निर्णयं कुर्वन्तः अधिकारिणः मन्त्रिणश्च

मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः हिमाचलप्रदेश-राज्यविद्युत्मण्डलाय (एचपीएसईबीएल) राज्ये विद्युत्क्षयस्य समीचीनमूल्यांकनं कृत्वा विद्युत्चौर्य-निवारणार्थं प्रभावीपदं स्वीकुर्वन्तु इति निर्देशं दत्तवान्। सः अवदत् यत् विद्युत् हानिः न भवेत् एतदर्थम् अधिकारिभिः फीडर मीटरिंग इत्यादीनि प्रभावी उपायाः अवश्यं करणीयाः। अद्य अत्र एचपीएसईबीएल इत्यस्य ऊर्जाविभागस्य च अधिकारिभिः सह समागमस्य अध्यक्षतां कुर्वन् सः एतत् अवदत्। सः वाणिज्यिक- औद्योगिक- गृही-उपभोक्तृणां फीडर-मानचित्रणं कर्तुम् अपि निर्देशं दत्तवान् येन सर्वाः सूचनाः एकस्मिन् क्लिक-मात्रे उपलब्धाः भवितुम् अर्हन्ति। मुख्यमन्त्री उक्तवान् यत् एचपीएसईबीएल-इत्यस्य अधिकारिणः कर्मचारिणश्च ये सम्प्रति ऊर्जानिदेशालये, हिमाचलप्रदेशविद्युत्सञ्चारनिगमेषु, विद्युत्निगमेषु च प्रतिनियुक्तिविषये कार्यं कुर्वन्ति, तेषां कृते ३० अप्रैलपर्यन्तं विभागस्य चयनस्य विकल्पः दत्तः भवेत्।सः अवदत् यत् सिविलपक्षस्य कर्मचारिणः अपि लोकनिर्माणविभागं वा अन्यविभागं वा गन्तुं चयनं कर्तुं शक्नुवन्ति। सः स्पष्टीकृतवान् यत् एतेन कर्मचारिणां पदोन्नतिषु अन्येषु लाभेषु च किमपि प्रभावः न भविष्यति तथा च ते वर्तमानसेवास्थितौ कार्यं करिष्यन्ति। आवश्यकनीतिषु संशोधनं कृत्वा तेषां सर्वेषां लाभानाम् रक्षणं सर्वकारः सुनिश्चितं करिष्यति। मुख्यमन्त्री उक्तवान् यत् एचपीएसईबीएल-इत्यस्य कार्याणि सुदृढं कर्तुं, तस्य अधिकं सुदृढीकरणं च दृष्ट्या राज्यसर्वकारः आगामिषु मासेषु टी-मेटस्, लाइनमेन इत्येतयोः २००० पदानि पूरयिष्यति। मुख्यमंत्री सुक्खुः अपि ४५० मेगावाट शोङ्ग-टोङ्ग जलविद्युत् परियोजनायाः प्रगतेः समीक्षां कृत्वा अधिकारिभ्यः परियोजनां समये एव सम्पन्नं कर्तुं निर्देशं दत्तवान्। सः अवदत् यत् राज्यसर्वकारेण अस्याः परियोजनायाः नवम्बर, २०२६ यावत् पूर्णं कर्तुं लक्ष्यं निर्धारितम् अस्ति। एतेन सह परियोजनायाः आरम्भात् पूर्वं विद्युत् निष्कासनस्य योजनां सज्जीकर्तुं निर्देशाः अपि दत्ताः येन आपत्काले राजस्वस्य हानिः न भवति। मुख्यमन्त्री औद्योगिकक्षेत्रे दीर्घकालं यावत् नियुक्तानाम् अधिकारिणां कर्मचारिणां च स्थानान्तरणं याचितवान्, एतेन शासने पारदर्शिता, उत्तरदायित्वं च सुनिश्चितं भविष्यति।

# विमलनेगी मृत्युप्रकरणम्: हिमाचल- उच्चन्यायालये निष्पक्षान्वेषणाय याचिका प्रवेशिता




हिमसंस्कृतवार्ताः- शिमला। मुख्य अभियंता विमलनेगी इत्यस्य मृत्युप्रकरणस्य निष्पक्षतया अन्वेषणस्य आग्रहं कृत्वा हिमाचलप्रदेश- उच्चन्यायालये याचिका प्रवेशिता अस्ति। विमलनेगी इत्यस्य पत्नी किरणनेगी इत्यनया सीबीआइ इत्यस्मै अस्य विषयस्य अन्वेषणं कर्तुं याचिका प्रवेशिता। एतावता एसआईटी- अनुसन्धानेन असन्तुष्टा सन् याचिकाकर्तृ उच्चन्यायालयात् आग्रहं कृतवती यत् अस्य मृत्युसम्बद्धस्य प्रकरणस्य निष्पक्ष- अनुसन्धानं सुनिश्चित्य अन्वेषणं सीबीआई-सङ्घटनाय समर्पयितुम् आदेशं निर्गन्तुं शक्नोति। आवेदकः विमलनेगी इत्यस्य मृत्युं अन्वेषणं विना आत्महत्यायाः प्रकरणं इति एसआइटी अथवा राज्यपुलिसस्य आपत्तिं प्रकटितवान् अस्ति। अस्मिन् सति हिमाचलप्रदेशविद्युत्निगमसीमित- कम्पन्याः मुख्याभियंतुः निदेशकस्य विमलनेगी इत्यस्य शवः १८ मार्च दिनाङ्के बिलासपुरस्य गोबिन्दसागरसरोवरे प्राप्तः। नेगी लुप्तः अभवत् ततः परं तस्य पत्नी मुख्यमन्त्रिणं प्रति पत्रं लिखितवती यत् विद्युत् निगमस्य एमडी हरिकेश मीणा, निदेशकः देसराज इत्यादयः वरिष्ठाः अधिकारिणः च तस्याः पतिं उत्पीडयन्ति स्म इति आरोपं कृतवती। नेगीपत्न्याः उपालम्भे कार्यं कृत्वा पूर्वनिदेशकस्य देसराजस्य एमडी हरिकेशमीणा इत्यस्य च विरुद्धं गम्भीराः आरोपाः कृताः, येषां विरुद्धं न्यूशिमलापुलिसस्थानके प्रवेशिते प्राथमिकीपत्रे आरोपः कृतः अस्ति।

# हिमाचलम्- पंचायताभिलेखे पशूनां पञ्जीकरणमपि आवश्यकम्



अधुना हिमाचलप्रदेशे ई-ग्रामस्वराजस्य ऑनलाइन-पटले ई-परिवारसहितं प्रत्येकं परिवारस्य दुग्ध-पशूनां ऑनलाइन-पञ्जीकरणं भविष्यति। 22 अप्रैलतः राज्यस्य सर्वेषु 3615 पंचायतेषु द्वारे द्वारे पञ्जीकरणं आरभ्यते, यस्मिन् परिवारेभ्यः आधारस्य ई-केवाईसी, राशनप्रपत्रं च पटले पञ्जीकृतं प्राप्स्यति, तथा च दुग्धपशूनां स्टिकसङ्ख्या अपि पञ्जीकृता भविष्यति, येन पशूनां कृते सर्वकारेण योजनां निर्मातुं तेषां कार्यान्वयनेन च सम्बद्धाः सर्वाः प्रदत्ताः रोगेभ्यः रक्षणेण सह, अन्तर्जाले उपलब्धाः भविष्यन्ति। तदर्थं हिमाचलप्रदेशस्य पंचायतीराजविभागेन सम्पूर्णे राज्ये पंचायतसचिवेभ्यः प्रशिक्षणं प्रदत्तम् अस्ति। राज्यसर्वकारेण विभागेन च २० मेपर्यन्तं राज्ये ३६०० तः अधिकेषु पंचायतेषु द्वारे द्वारे पञ्जीकरणस्य लक्ष्यं निर्धारितम् अस्ति। अधुना पंचायतराजविभागेन परिवारपञ्जिकायाः अद्यतनीकरणाय सज्जीकृते प्रारूपे अन्यः स्तम्भः योजितः अस्ति। अधुना, कस्य दुग्ध-उत्पादकस्य गृहस्थ पशोः स्वामित्वं कस्य कुटुम्बस्य कस्मिन् पंचायते अस्ति इति अपि प्रवेशः भविष्यति। राज्ये कति पालितः पशवः सन्ति, ते काः प्रजातयः सन्ति इति विषये सटीकदत्तांशः अपि सर्वकाराय विभागाय च अन्तर्जालद्वारा प्राप्स्यति। ग्रामपञ्चायतस्य परिवारपञ्जिकायां परिवारसदस्यानां विवरणेन सह यदि कस्यचित् पालितः पशुः अस्ति तर्हि तस्य विवरणमपि अभिलेखितं भविष्यति। गो, महिषः, बकः, मेषः इत्यादिभिः सह याकाः अपि जनजातियेषु क्षेत्रेषु समाविष्टाः सन्ति । पंचायतसचिवः स्वपञ्चायतस्य द्वारे द्वारे गत्वा ई-स्वराज पटले प्रवेशं करिष्यति।

## २० मे यावत् कार्यं सम्पन्नं कर्तुं निर्देशाः

राज्यस्य बृहत्तमस्य मण्डलस्य काङ्गरा इत्यस्य जिलापञ्चायतपदाधिकारी नीलम कटोचः कथयति यत् ग्रामपञ्चायतेषु परिवारपञ्जिकायाः

अद्यतनीकरणस्य सङ्गमेन केषु परिवारेषु कति दुग्धोत्पादकाः पालितःजीविनः सन्ति इति विषये अपि नूतनरूपेण प्रविष्टयः क्रियन्ते। अस्य कृते एप्रिल-मासस्य २२ दिनाङ्कात् आरभ्य द्वारे द्वारे पञ्जीकरण-अभियानं प्रचलति ।निदेशालयेन २० मे-मासपर्यन्तं एतत् कार्यं सम्पन्नं कर्तुं निर्देशाः दत्ताः सन्ति ।

# न्यूनछात्राणां परीक्षाकेन्द्रेषु ३० अप्रैलपर्यन्तं बोर्डकार्यालये न्यूनतया छात्रशुल्कं निक्षेपितव्यं भविष्यति




हिमसंस्कृतवार्ताः।हिमाचलप्रदेशविद्यालयशिक्षामण्डल-धर्मशाला अन्तर्गतं २०२४-२५ वर्षेषु न्यूनछात्राणां परीक्षाकेन्द्रेषु ३० अप्रैलपर्यन्तं बोर्डकार्यालये न्यूनतया छात्रशुल्कं निक्षेपितव्यं भविष्यति तदनन्तरं मे १ दिनाङ्कात् १५ मेपर्यन्तं प्रतिकक्षां १००० रुप्यकाणां विलम्बशुल्कं गृह्यते। अस्मिन् विषये राज्यशिक्षामण्डलेन राज्यस्य सर्वेषु परीक्षाकेन्द्रेषु न्यूनसंख्यकाः छात्राः सन्ति इति सूचितं कृत्वा 1000 रुप्यकाणां शुल्कं निक्षेपयितुं कथितम् अस्ति। प्रतिवर्षं विद्यालयशिक्षामण्डलधर्मशाला राज्ये अन्तिमपक्षपरीक्षाणां केन्द्राणि निर्माति। अस्मिन् क-वर्गस्य अन्तर्गतं +११ तथा +२ महाविद्यालयकेन्द्राणि, ख-वर्गस्य अन्तर्गतं +११ तथा +२ विद्यालयपरीक्षाकेन्द्राणि निर्मीयन्ते तथा च ग-वर्गस्य अन्तर्गतं १० कक्षायाः परीक्षाकेन्द्राणि क्रियन्ते, यस्मिन् लिखितपरीक्षायाः कृते प्रतिपरीक्षाकेन्द्रे ६० छात्राः अनिवार्यतया भवेयुः। अस्मिन् यदि छात्राणां संख्या न्यूना भवति तर्हि बोर्डेन परीक्षाकेन्द्रात् प्रतिछात्रं 300 रुप्यकाणि गृह्यन्ते। अधुना नियमे कृते संशोधने परीक्षाकेन्द्रे अभ्यर्थिनः न्यूनाः सन्ति चेत्, १ दिनाङ्कात् ३० एप्रिलपर्यन्तं 1000 रुप्यकाणां शुल्कं भवति।

# सर्वोच्चन्यायालयेन पश्चिमबङ्गप्रदेशे राष्ट्रपतिशासनस्य

## अर्धसैनिकबलानाम् नियुक्त्यर्थं च याचिकायां किमपि आदेशं पारयितुं अस्वीकृतम्



सर्वोच्चन्यायालयेन सोमवासरे राष्ट्रपतिशासनस्य आरोपणं, बङ्गप्रदेशे अर्धसैनिकबलानाम् नियुक्त्यर्थं च याचिकायां किमपि आदेशं पारयितुं अस्वीकृतम्। वक्फ-अधिनियमस्य विरुद्धं मुर्शिदाबाद-हिंसायाः अनन्तरं न्यायालयेन अस्मिन् विषये निर्णयः करणीयः इति याचिकाकर्ता याचनां कृतवान् आसीत् । अस्मिन् विषये न्यायाधीशः बी.आर.गवई-न्यायाधीशः ए.जी.मसिहयोः पीठिका अवदत् यत् भवान् इच्छति यत् वयं राष्ट्रपतिं राष्ट्रपतिशासनं आरोपयितुं निर्देशं दद्मः। तथापि अस्माकं उपरि कार्यकारिणीक्षेत्रे हस्तक्षेपस्य आरोपः क्रियते। अधिवक्ता विष्णुशंकरजैन द्वारा पञ्जीकृतायाः याचिकायाः विषये वरिष्ठ न्यायाधीश बी आर गवई इत्यनेन एषा टिप्पणी कृता। आगामिमासे न्यायाधीशः गवई भारतस्य मुख्यन्यायाधीशः भवितुम् अर्हति इति वदामः। एषा टिप्पणी तस्मिन् समये आगता यदा सर्वोच्चन्यायालयस्य सत्तापक्षस्य च नेतृणां मध्ये द्वन्द्वस्य स्थितिः विकसिता अस्ति। तमिलनाडुप्रकरणे दत्तस्य ऐतिहासिकनिर्णयस्य अनन्तरं एषः विषयः उष्णः अभवत् ।

# सत्यसेवकधर्ममार्गः



### (अनुष्टुप् छन्दसि)

**-किरण सुमन संस्कृतशिक्षिका**
**विद्योत्तमा संस्कृत अकादमी**

यः धर्मे सततं स्थितो, नीतिर्मार्गं न मुञ्चति।
स एव सत्यसेवकः, राष्ट्रं यः पालयेद् दृढम् ॥१॥

न स्वार्थं न च लोभं सः, न मानं न च सत्क्रियाम्।
प्रजायै यः समर्पेत्, तनुं चित्तं च भारते॥२॥

निशीथे यः पठेन्नित्यं, दिवा सेवापरः सदा।
क्लेशं न मन्यते दुःखं, यशः कामयते न च ॥३॥


न पदं न च कीर्तिं वा, न लाभं पश्यते क्वचित्।
कर्तव्यं परमं कृत्वा, सेवामूलं हि जीवनम्॥४॥

संविधानविधिं नीत्वा, यः न्यायं पालये सदा।
प्रजानां हितमिच्छन् सन्, न हानिं गणयेदपि ॥५॥

सेवकदिवसे प्राप्ते, वन्दे तान् दृढव्रतान्।
यैः प्रेरितं समुत्तिष्ठेत्, राष्ट्रं धर्मपथा सदा॥६॥

# राहुलगान्धी भारतीयनागरिकः अस्ति वा न-न्यायालयः

इलाहाबाद उच्चन्यायालयस्य लखनऊ-पीठिका सोमवासरे राहुलगान्धिनः-नागरिकतायाः विषये प्रकरणस्य श्रवणं कुर्वन् केन्द्रसर्वकारात् दशदिनान्तरे स्वस्य स्थितिं स्पष्टीकर्तुं आदेशं दत्तवती अस्ति। उच्चन्यायालयेन केन्द्रसर्वकारेण पृष्टं यत् राहुलगान्धी भारतीयनागरिकः अस्ति वा न वा इति। केन्द्रसर्वकारेण सोमवासरे न्यायाधीशस्य ए.आर.मसूदी-न्यायाधीशस्य अजयकुमारश्रीवास्तव-प्रथमस्य च विभागपीठस्य समक्षं स्थितिप्रतिवेदनमपि प्रस्तुतम्।




अस्मिन् विषये न्यायालयेन उक्तं यत् केवलं ज्ञातुम् इच्छति यत् राहुलगान्धी नागरिकः अस्ति वा न वा। अस्य प्रकरणस्य अग्रिमं श्रवणं मे ५ दिनाङ्के भविष्यति।

# संस्कृतम् व्यवसायिक-जीवनोपयोगिनी भाषा अस्ति — डॉ. मनोजकुमारः

## स्वर्गीया शान्तिदेव्याः पुण्यतिथौ विद्यार्थिनः संस्कृत-साधकाः च सम्मानिताः

हिमसंस्कृतवार्ताः। पटना, २१ अप्रैलः। 'सर्वत्र संस्कृतम्' इत्यस्मिन अभियाने 'बिहार-संस्कृत-संजीवन-समाजस्य' च संयुक्त-तत्वावधानस्य अन्तर्गतं राजकीय-संस्कृत-महाविद्यालये, काजीपुरे, स्वर्गीयायाः शान्तिदेव्याः पुण्यतिथिः श्रद्धापूर्वकं संस्कृतमय-पर्यावरणे सम्यक् आचरिता। अस्मिन् सन्दर्भे आयोजिते 'संस्कृति-संस्कार-संस्कृतम्' इत्यस्मिन् कार्यक्रमे संस्कृत-भाषण-स्पर्धायाः विजेतारः, उत्कृष्ट-संस्कृत-साधकाः च विधिपूर्वकं सम्मानिताः अभवन्। कार्यक्रमस्य शुभारम्भः मुख्य-अतिथिभिः अन्य-अतिथिभिः च स्वर्गीया शान्तिदेव्याः प्रतिमायाम् पुष्पांजलिं समर्प्य कृतः। प्रमुख-अतिथिः आसीत् — बिहार-तिब्बत-मैत्री-संघस्य अध्यक्षः डॉ. शिवाकान्त-तिवारी। कार्यक्रमस्य अध्यक्षः आसीत् — महाविद्यालयस्य प्राचार्यः डॉ. मनोजकुमारः। विशेष-अतिथयः आसन् — पूर्व-विभागाध्यक्षः डॉ. मिथिलेशकुमार-तिवारी, डॉ. शशिकान्त-तिवारी, डॉ. ज्योति-शङ्कर-सिंह, श्रीरामनाथ-पाण्डेयः, संस्कृत-शिक्षकः मुरलीधर-शुक्लः च अन्ये च विद्वांसः।

मुख्य-अतिथिना डॉ. शिवाकान्त-तिवारिना उक्तम् — "मातुः स्वप्नस्य, संकल्पस्य च अनुवर्तनं पुत्रेण सच्चिदानन्दमयी श्रद्धाञ्जलिः भवति। संस्कृतस्य प्रचार-प्रसारार्थं निरन्तरं यः कर्तव्यपरायणः भवति, सः एव मातृभाषायाः प्रति सच्चं समर्पणं दर्शयति।"डॉ. मिथिलेशकुमार-तिवारिना, डॉ. मुकेशकुमार-ओझा-वर्यस्य अहर्निशं संस्कृतसेवायाः प्रशंसा कृत्वा उक्तम् — "संस्कृतभाषा गङ्गानद्याः सदृशी शाश्वती च पवित्रा च अस्ति।




"कार्यक्रमाध्यक्षेन डॉ. मनोजकुमार-वर्येण अभिनिबद्धम् —"जीवनस्य प्रत्येक-अवस्थायाम्, जन्मतः मृत्युपर्यन्तम्, सर्वाणि शास्त्राणि संस्कृते एव अधिष्ठितानि सन्ति। संस्कृतं व्यवसायिक-जीवनोपयोगिनी च भाषा अस्ति। संस्कृताध्ययनस्य प्रभावात् व्यक्तित्वे नैतिकता, परोपकारः, त्यागभावना च स्वाभाविकतया विकसितेते।"डॉ. शशिकान्त-तिवारिना निर्दिष्टम् — "संस्कृतभाषा आत्म-कल्याणस्य, परिवार-कल्याणस्य, मानवीय-विकासस्य च प्रमुखं साधनम् अस्ति। संस्कृतं केवलं धर्मे न तु विज्ञान-वाणिज्य-व्यवहारेषु अपि प्रकाशस्तम्भवत् अस्माकं मार्गदर्शिका अस्ति।"डॉ. राघवनाथ-झा-वर्येण संस्कृत-पत्रिकानां समृद्धपरम्परायाः विषये प्रकाशः कृतः। तेन उक्तम् —"अद्यापि भारतदेशे संस्कृत-पत्रिकाः नियमितरूपेण प्रकाशिताः भवन्ति।"

स्पर्धायाः विजेतारः —

प्रथमं स्थानं — कुमारी दीपाली।
द्वितीयं स्थानं — नीरजकुमारः।
तृतीयं स्थानं — नितीशकुमारः।
चतुर्थं स्थानं — मेधाकुमारी।
पञ्चमं स्थानं — चन्द्रशेखरः, देवेशकुमारः च।

### एतेषां विजेतॄणां प्रतीक-चिह्नानि, प्रोत्साहनार्थं लेखन्यः च प्रदत्ताः

कार्यक्रमे अध्यक्षीय-उद्बोधनं दत्वा 'आधुनिको भव — संस्कृतं वद' अभियानस्य राष्ट्रीयाध्यक्षः, 'बिहार-संस्कृत-संजीवन-समाजस्य' महासचिवः च डॉ. मुकेशकुमार-ओझा-वर्येण उक्तम् — "शान्तिदेव्याः स्मृति-आयोजनस्य माध्यमेन संस्कृत-हिन्दी-भाषयोः संवर्धनाय नवस्फूर्तिः जाताः।"

अस्मिन अवसर उपलक्ष्ये, हृदयनारायण-झा, डॉ. कमल-किशोरः, उग्र-नारायण-झा, डॉ. राघवनाथ-झा, मुरलीधर-शुक्लः, श्रीरामनाथ-पाण्डेयः, आयुष-मिश्रः, डॉ. ज्योति-शङ्कर-सिंह इत्यादयः त्रिंशदधिकाः संस्कृत-प्रचारकाः विद्यार्थीश्च सम्मानिताः अभवन्।कार्यक्रमे स्वस्तिवाचनं आयुष-मिश्रेण कृतम्। धन्यवाद-ज्ञापनं प्राध्यापक-विवेक-तिवारी-वर्येण सम्यक् सम्पादितम्।